# श्रीललिताऽष्टोत्तरशतनामदिव्यस्तोत्रं

.श्रीः अथ श्रीललिताऽष्टोत्तरशतनामदिव्यस्तोत्रं

शिवप्रियाशिवाराध्या शिवेष्टा शिवकोमला .

शिवोत्सवा शिवरसा शिवदिव्यशिखामणिः .. 1..

शिवपूर्णा शिवघना शिवस्था शिववल्लभा .

शिवाभिन्ना शिवार्धांगी शिवाधीना शिवंकरी .. 2..

शिवनामजपासक्ता शिवसांनिध्यकारिणी .

शिवशक्तिः शिवाध्यक्षा शिवकामेश्वरी शिवा .. 3..

शिवयोगीश्वरीदेवी शिवाज्ञावशवर्तिनी .

शिवविद्यातिनिपुणा शिवपंचाक्षरप्रिया .. 4..

शिवसौभाग्यसंपन्ना शिवकैंकर्यकारिणी .

शिवांकस्था शिवासक्ता शिवकैवल्यदायिनी .. 5..

शिवक्रीडा शिवनिधिः शिवाश्रयसमन्विता .

शिवलीला शिवकला शिवकांता शिवप्रदा .. 6..

शिवश्रीललितादेवी शिवस्य नयनामृता .

शिवचिंतामणिपदा शिवस्य हृदयोज्ज्वला .. 7..

शिवोत्तमा शिवाकारा शिवकामप्रपूरिणी .

शिवलिंगार्चनपरा शिवालिंगनकौतुकी .. 8..

शिवालोकनसंतुष्टा शिवलोकनिवासिनी .

शिवकैलासनगरस्वामिनी शिवरंजिनी .. 9..

शिवस्याहोपुरुषिका शिवसंकल्पपूरका .

शिवसौंदर्यसर्वांगी शिवसौभाग्यदायिनी .. 10..

शिवशब्दैकनिरता शिवध्यानपरायणा .

शिवभक्तैकसुलभा शिवभक्तजनप्रिया .. 11..

शिवानुग्रहसंपूर्णा शिवानंदरसार्णवा .

शिवप्रकाशसंतुष्टा शिवशैलकुमारिका .. 12..

शिवास्यपंकजार्काभा शिवांतःपुरवासिनी .

शिवजीवातुकलिका शिवपुण्यपरंपरा .. 13..

शिवाक्षमालासंतृप्ता शिवनित्यमनोहरा .

शिवभक्तशिवज्ञानप्रदा शिवविलासिनी .. 14..

शिवसंमोहनकरी शिवसांराज्यशालिनी .

शिवसाक्षाद्ब्रह्मविद्या शिवतांडवसाक्षिणी .. 15..

शिवागमार्थतत्त्वज्ञा शिवमान्या शिवात्मिका .

शिवकार्यैकचतुरा शिवशास्त्रप्रवर्तका .. 16..

शिवप्रसादजननी शिवस्य हितकारिणी .

शिवोज्ज्वला शिवज्योतिः शिवभोगसुखंकरी .. 17..

शिवस्य नित्यतरुणी शिवकल्पकवल्लरी .

शिवबिल्वार्चनकरी शिवभक्तार्तिभंजनी .. 18..

शिवाक्षिकुमुदज्योत्स्ना शिवश्रीकरुणाकरा .

शिवानंदसुधापूर्णा शिवभाग्याब्धिचंद्रिका .. 19..

शिवशक्त्यैक्यललिता शिवक्रीडारसोज्ज्वला .

शिवप्रेममहारत्नकाठिन्यकलशस्तनी .. 20..

शिवलालितळाक्षार्द्रचरणांबुजकोमला .

शिवचित्तैकहरणव्यालोलघनवेणिका .. 21..

शिवाभीष्टप्रदानश्रीकल्पवल्लीकरांबुजा .

शिवेतरमहातापनिर्मूलामृतवर्षिणी .. 22..

शिवयोगींद्रदुर्वासमहिम्नस्तुतितोषिता .

शिवसंपूर्णविमलज्ञानदुग्धाब्धिशायिनी .. 23..

शिवभक्ताग्रगण्येशविष्णुब्रह्मेंद्रवंदिता .

शिवमायासमाक्रांतमहिषासुरमर्दिनी .

शिवदत्तबलोन्मत्तशुंभाद्यसुरनाशिनी .. 24..

शिवद्विजार्भकस्तन्यज्ञानक्षीरप्रदायिनी .

शिवातिप्रियभक्तादिनंदिभृंगिरिटिस्तुता .. 25..

शिवानलसमुद्भूतभस्मोद्धूलितविग्रहा .

शिवज्ञानाब्धिपारज्ञमहात्रिपुरसुंदरी .. 26..

इत्येतल्ललितानाम्नामष्टोत्तरशतं मुने .

अनेकजन्मपापघ्नं ललिताप्रीतिदायकं .. 27..

सर्वैश्वर्यप्रदं नृणामाधिव्याधिनिवारणं .

यो मर्त्यः पठते नित्यं सर्वान्कामानवाप्नुयात् .. 28..

इतिश्रीललितोपाख्याने स्तोत्रखंडे श्रीललिताष्टोत्तर-
शतनामस्तोत्रं संपूर्णं ..